







# तृतीयः घट्टः

## स्थानीयसर्वकारः

## प्रशासनं च

**पञ्चमः अध्यायः**

# पञ्चायतीराजः

जनाः यदा स्वप्रतिनिधीन् चिन्वन्ति तदनन्तरं किं भवति ? ग्रामीणक्षेत्रेषु चितैः प्रतिनिधिभिः निर्णयाः कथं स्वीक्रियन्ते ? अत्र वयं ग्रामसभां द्रक्ष्यामः, यस्यां जनाः प्रत्यक्षरूपेण भागं गृह्णन्ति अपि च स्वप्रतिनिधिभ्यः कार्यविवरणं याचन्ते।



अद्यतनं दिनं बहुविशिष्टम् अस्ति। सर्वे जनाः शीघ्रं शीघ्रं ग्रामसभां गच्छन्ति। किं भवन्तः जानन्ति किमर्थं ? यतोहि पंचायतस्य र्वाचनानन्तरम् अद्य ग्रामसभायाः उपवेशनं भवति। हरदास-ग्रामस्य जनाः इदं ज्ञातुम् अतीव उत्सुकाः सन्ति यत् नूतन-ग्राम-पञ्चसभा तेषां कृते कां योजनां कृतवती अस्ति।

ग्रामसभा कस्यचित् पञ्चातक्षेत्रस्य निवासिनां सर्वेषां वयस्कानां सभा भवति। भवितुं शक्नोति यत् तस्मिन् केवलम् एकः ग्रामः स्यात् अथवा ततः अपि अधिकः। यथा अस्मिन् उदाहरणे प्रदत्तम् अस्ति। अनेकेषु राज्येषु प्रत्येकं ग्रामस्य ग्रामसभायाः उपवेशनं पृथक् पृथक् भवति। कोऽपि जनः यस्य आयुः अष्टादश वर्षं ततः अधिकं वा अस्ति, यस्मै मतदानस्य अधिकारः अस्ति तथा च यस्य नाम ग्रामस्य मतदानसूच्यां स्यात्, सः ग्रामसभायाः सदस्यः भवति।

## ग्रामसभा

*ग्रामसभायाः उपवेशनस्य आरम्भे सरपंचः पंचः च राजमार्गस्य परिष्कार-निमित्तं जायमानस्य व्ययस्य विवरणं दत्तवान्। अयं राजमार्गः ग्रामं मुख्यमार्गेण योजयति। तदनन्तरं जलस्य न्यूनतायाः विषये चर्चा प्रारब्धा।*

*ग्रामस्य निवासिनी तिज्या वक्तुम् आरब्धवती, "हरदासग्रामे जलस्य न्यूनतायाः समस्या बाहुल्येन वर्धिता अस्ति। नलकूपानां*

एका पञ्चायतः बहुषु लघुषु क्षेत्रेषु विभक्ता भवति। प्रत्येकं वार्ड इति स्वकीयम् एकं प्रतिनिधिं चिनोति। यः वार्डपञ्च नाम्ना ज्ञायते । अनेन सह पञ्चायतक्षेत्रस्य जनाः मिलित्वा सरपञ्चं चिन्वन्ति, यः पञ्चायतस्य मुख्यः भवति। वार्डपञ्चः सरपञ्चः इति उभौ मिलित्वा ग्रामपञ्चसभायाः गठनं पञ्चवर्षाणां कृते कुर्वन्ति।

ग्रामपञ्चसभायाः कश्चन सचिवः भवति यः ग्रामसभायाः अपि सचिवः भवति । सचिवस्य निर्वाचनं न भवति । तस्य नियुक्तिः सर्वकारेण क्रियते । सचिवस्य कार्यम् अस्ति ग्रामसभा एवं ग्रामपञ्चसभायाः समितेः आह्वानम् तथा च या कापि चर्चा निर्णयः वा भवेत् तस्य सञ्चयीकरणम्।

*जलस्तरः भूमेः अतीव नीचैः गतः अस्ति। काठिन्येन अतिन्यूनं जलम् नलकूपेभ्यः आगच्छति । महिलाभिः किलोमीटर-त्रय-दूरात् सुरुनद्याः जलम् आनेतव्यं भवति"।*

केनचित् सदस्येन परामर्शः दत्तः यत् सुरुनद्याः जलं नलिकया आनीय ग्रामे कस्मिंश्चित् बृहति जलागारे पूरयामः तस्मात् जलस्यापूर्तिः वर्धिष्यते। परन्तु अपरे जनाः अनुभूतवन्तः यत् इयं महार्घप्रक्रिया भवितुं शक्नोति । ते उक्तवन्तः यत् अस्य वर्षस्य कृते नलकूपान् भूमेः गहनतलं प्रति नयामः अपि च कूपान् शोधयामः। तिज्या उक्तवती, "एतावता तु कार्यं न चलिष्यति! अस्माभिः काचित् सदृढा व्यवस्था करणीया भविष्यति यतो हि प्रत्येकं वर्षे जलस्तरः न्यूनीभवति । यावत् जलं भूमौ प्रविशति ततोऽपि अधिकं वयं प्रयोगं कुर्मः"।

ग्रामसभायाः अपरः कश्चित् सदस्यः अनवरः सर्वान् बोधितवान् यत् सः महाराष्ट्रस्य एकस्मिन् ग्रामे जलसंरक्षणस्य नूतनान् उपायान् दृष्टवान् अस्ति सः तस्मिन् ग्रामे स्वभ्रात्रा सह मेलितुं गतवान् आसीत्। सः जलसंवर्धन-विकासकार्यक्रमः (वाटर-शेड)इति उच्यते। सः श्रुतवान् आसीत् यत् सर्वकारेण एतस्य कृते धनराशिः अपि प्रदत्तः आसीत्। तस्य भ्रातुः ग्रामे जनाः पादपानां रोपणं कृतवन्तः आसन्, क्षुद्रनदेषु जलबन्धकान् अर्थात् लघु-जल-बन्धकान् निर्मितवन्तः आसन् अपि च जलागाराणां निर्माणं कृतवन्तः आसन्।

अनवरस्य एषः विचारः सर्वेभ्यः अरोचत अपि च सर्वे एतस्मिन् विषये ज्ञातुं पंचायतम् उक्तवन्तः।

*ग्रामसभा का भवति ?
*ग्रामसभायाः उपवेशने अधुनापर्यन्तं कासां कासां समस्यानाम् उपरि चर्चा अभवत् ? तासां कीदृशानि समाधानानि उक्तानि न्ति।

ग्रामसभायां चर्चार्थम् अग्रिमः विषयः आसीत् यत् ये निर्धनतारेखायाः अधस्तने भागे विद्यमानाः जनाः सन्ति तेषां सूचिनिर्माणार्थम् अन्येषां जनानां स्वीकृति-प्रकटन-कार्यक्रमः। यथैव सूच्याम् अङ्कित-नामानि पठितुम् आरब्धानि, जनानां मध्ये परस्परं चर्चा अजायत। नटवरः सद्यः एव वर्णयुक्तं दूरदर्शनयन्त्रं क्रीतवान् अस्ति अपि च तस्य पुत्रः तस्य कृते नूतनं द्विचक्रिकायानम् अपि प्रेषितवान् अस्ति। सः निर्धनतारेखायाः सूचीतः अधः कथं भवितुं शक्नोति ? सूरजमलः स्वसमीपे उपविष्टं जनं शनैः उक्तवान्।



सरोजः सुखीबाई उक्तवान् "बिरजूः इत्यस्य नाम अस्यां सूच्यां कथम् आगतम्? तस्य पार्श्वे तु एतावती भूमिः अस्ति । एतस्यां सूच्यां तु केवलं निर्धनैः जनैः भवितव्यम् । ओमप्रकाशः कश्चित् श्रमिकः अस्ति तस्य पार्श्वे किंचिदपि भूमिः नास्ति सः काठिन्येन स्वकीयं निर्वाहं करोति परन्तु तस्य नाम एतस्यां सूच्यां नास्ति" । सुखीबाई उक्तवती यत् "भवन्तः तु जानन्ति एव नटवरः बिरजूः च अमीरचंदस्य मित्रे स्तः । अधुना अमीरचन्दं कश्चित् किमपि न वक्तुं शक्नोति? अमीरचंदः पूर्वं ग्रामस्य भूस्वामी आसीत् अपि च अधुना अपि सः महत्याः भूम्याः स्वामी अस्ति । परन्तु अस्माभिः ओमप्रकाशस्य नाम सूच्यां योजनीयम् एव" ।

सरपंचः दृष्टवान् यत् जनानां मध्ये मन्दध्वनिना वार्तालापः भवति स्म । सः उक्तवान् यत्

ग्रामपंचायतः सम्पूर्णस्य ग्रामस्य हितार्थं निष्पक्षरूपेण कार्यं कर्तुं शक्नुयात् एतस्मिन् ग्रामसभायाः महत्त्वपूर्णम् योगदानं भवति। ग्रामसभायाः उपवेशने ग्रामपंचायतः स्वयोजनाः जनानां पुरतः उपस्थापयति। ग्रामसभा पंचायतं स्वैच्छिककार्यात् निरोद्धुं शक्नोति। सार्धमेव धनस्य दुरुपयोगः अपि च अनुचितकार्यं न भवेत् एतस्य निरीक्षणम् अपि करोति । अनेन प्रकारेण ग्रामसभा चितप्रतिनिधीनाम् उपरि दृष्टिं स्थापयति अपि च ते दायित्ववन्तः जागरूकाः च सदैव भवेयुः तन्निमित्तं महत्त्वपूर्णं कर्तव्यनिर्वहणं करोति ।

यदि कश्चित् किमपि वक्तुमिच्छति तर्हि सः वदेत् । सरोजः सूरजमलं वक्तुं बाध्यं कर्तुम् इष्टवान् यत् सः नटवरस्य बिरजूः इत्यस्य च विषये किमपि पृच्छेत् । परन्तु सूरजमलः तूष्णीं भूत्वा स्थितवान् । अमीरचंदः ग्रामसभायाम् उपविष्टः सन् सर्वान् पश्यति स्म । सरोजः उत्थाय उक्तवान् यत् ओमप्रकाशस्य नाम सूच्यां स्यात् । अपरे जनाः अपि उक्तवन्तः यत् ओमप्रकाशस्य परिवारः अतीव निर्धनः अस्ति । सरपंचः पृष्टवान् यत् तस्य नाम सूच्यां किमर्थं नासीत् । येन शिक्षकेण निर्धनतारेखाविषयकं सर्वेक्षणं कृतम् आसीत् तेन ज्ञापितं यत् सः ओमप्रकाशस्य गृहं बहुधा गतवान् परन्तु सर्वदा तस्य गृहे तालकम् आसीत् । सः प्रायः कुत्रचित् कार्यम् अन्वेष्टुं गतवान् आसीत् । प्रधानः निर्दिष्टवान् यत् ओमप्रकाशस्य पारिवारिक-आयस्य आकलनं भवेत् अपि च तस्य आयः सर्वकारद्वारा निर्धारितराशितः न्यूनः अस्ति तर्हि तस्य नाम अपि सूच्यां सम्मिलितं भवेत् ।

* *ग्रामसभायां निर्धनतारेखायाः अधोभागे विद्यमानानां परिवाराणां या सूची निर्धारिता जायते स्म, किं तस्यां काऽपि समस्या आसीत् ? यदि आसीत् तर्हि सा समस्या का आसीत् ?*
* *सरोजः सूरजमलेन सह वक्तुं उक्तवान् पुनः अपि सः किमर्थम् तूष्णीम् अभूत् ?*
* *किं भवत्यः अन्याः एतादृशीः घटनाः दृष्टवत्यः यत्र जनाः आत्मनः कृते अपि न वक्तुं शक्नुवन्ति ? भवतीनाम् अनुसारम् एवंकिमर्थं भवति ? मनुष्यः कस्मात् हेतोः न वदति ?*

**ग्रामपंचायतः**



*महाराष्ट्रस्य द्वौ ग्रामप्रधानौ यौ २००५तमे वर्षे स्वपंचाते उल्लेखनीयानि कार्याणि कर्तुं निर्मल-ग्राम-पुरस्कारेण सम्मानितौ ।*

ग्राम-पंचायतस्य नियमितरूपेण उपवेशनं भवति । तस्य मुख्यकार्यं तस्य क्षेत्रे ये ग्रामाः सन्ति तेषु विकास-कार्यक्रमाणां क्रियान्वयनं कारणीयं भवति । यथा भवद्भिः ज्ञातं ग्रामसभा एव पंचायतस्य कार्यस्य कृते स्वीकृतिं ददाति तदा पंचायतः स्वकार्यं कर्तुं पारयति ।

केषुचित् राज्येषु ग्रामसभाः कार्यं कारयितुं समितीनां निर्माणं कुर्वन्ति उदाहरणार्थं निर्माणसमितिः । मन्यतां यत् ग्रामे किञ्चित् सामुदायिकभवनं निर्मापयितव्यम् तर्हि एतत् कार्यं निर्माणसमितिः करिष्यति । एतासु समितिषु केचन सदस्याः ग्रामसभायाः भवन्ति अपि च केचन पंचायतस्य । एतौ द्वौ मिलित्वा ग्रामस्य विकासार्थं

**ग्राम-पञ्चायतस्य कार्याणि**

- राजमार्गाणां नलिकानां विद्यालयानां भवनानां जलस्य स्रोतसां तथा च अन्य-सार्वजनिकोपयोगस्य भवनानां निर्माणं तेषां संरक्षणम् च।
- स्थानीय-करस्थापनम् अपि च तस्य एकत्रीकरणं ग्राम्यजनानां कृते आजीविकादान-सम्बद्धानां योजनानां क्रियान्वयनम्।

**ग्राम-पंचायतस्य आयस्य स्रोतांसि**

- गृह्यकरात् विपणिकरात् च प्राप्यमाणः राशिः।
- विभिन्न-सर्वकारि-विभागैः क्रियान्वयित-योजनानां राशिः यः मण्डलात् मण्डलपंचायत्तः च आगच्छति।
- समुदायस्य कार्यार्थं लभमानः दानराशिः।

कार्यं कुर्वन्ति । पश्यामः यत् हरदास-ग्राम-पञ्चायत्तेन कानि कानि कार्याणि कृतानि । हरदासग्रामस्य ग्रामसभया जलसमस्यां समाधातुं के के विकल्पाः प्रदत्ताः आसन् किं तान् भवन्तः स्मरन्ति ? यदा हरदासग्रामपंचायतस्य उपवेशनम् अभवत् केचन प्रमुखाः एतं विषयं पुनः चर्चार्थम् उपस्थापितवन्तः। एतस्मिन् उपवेशने पञ्चप्रमुखाः प्रमुखाः सचिवाः च उपस्थिताः आसन्। पंचायतस्य सदस्याः आदौ एकस्य कूपस्य शोधनार्थं द्वौ हस्तकूप-यन्त्रे इतोऽपि गभीरं कर्तुं च विचारितवन्तः यस्मात् ग्रामवासिनः जलरहिताः न तिष्ठेयुः । पञ्चप्रमुखेण परामृष्टं यत् यतोहि पंचायत्तस्य पार्श्वे हस्तनल-कूपयन्त्रस्य निरीक्षणार्थं किञ्चित् धनम् अस्ति तर्हि तदेव धनम् एतस्मिन् कार्ये योजयितुं शक्यते । एतस्मिन् विचारे सर्वे सदस्याः सहमतिं प्रकटितवन्तः तथा च सचिवः तेषां निर्णयं सञ्चिकायाम् उल्लिखितवान्।

तदनन्तरं सर्वे सदस्याः मिलित्वा समस्यायाः स्थायि-समाधानार्थं विचारणां कृतवन्तः। ते जानन्ति स्म यत् अग्रिमायाः ग्रामसभायाः उपवेशने ग्रामसभासदस्याः पुनः प्रश्नान् प्रक्ष्यन्ति । केचन प्रमुखाः शङ्कां कुर्वन्तः पृष्टवन्तः यत् किं जल-संरक्षणेन जलस्य स्तरे



जलसंवर्धनविकास

कार्यक्रमे केवलं द्वयोः वर्षयोः एषा ऊषरभूमिः हरितिमायुक्तक्षेत्ररूपेण परिवर्तिता।

हरदास-ग्राम-पंचायत्ते के के निर्णयाः स्वीकृताः ? किं भवन्तः अनुभवन्ति यत् एते निर्णयाः आवश्यकाः आसन् ? किमर्थम् ? उपर्युक्तविवरणे प्रश्नं रचयतु यं जनाः अग्रिमे ग्रामसभायाः उपवेशने पंचायत्तं प्रष्टुं शक्नुवन्ति।



किमपि विशिष्टम् अन्तरम् आगमिष्यति । एतस्मिन् विषये महती चर्चा अभूत् । अन्ततोगत्वा एषः निर्णयः अभवत् यत् ग्रामपंचायत्तः खण्ड-विकासाधिकारिणा सह वार्तालापं कृत्वा एतस्याः योजनायाः विषये अधिकां सूचनां सङ्ग्रहीष्यति।

**पञ्चायतस्य स्तरत्रयम्**

हरदासग्रामस्य ग्रामसभायाः पंचायतस्य च विषये पठनानन्तरं भवन्तः ज्ञातवन्तः स्युः यत् पंचायती-राजव्यवस्था काचित् एतादृशी प्रक्रिया अस्ति यया जनाः स्वसर्वकारस्य कार्यक्रमेषु भागं गृह्णन्ति पंचायत्ती-राजव्यवस्था लोकतान्त्रिक-सर्वकारस्य प्रथमं सोपानम् अस्ति । ग्रामपंचायत्तः ग्रामसभां प्रति उत्तरदायी भवति यतोहि ग्रामसभायाः जनाः एव तं चिन्वन्ति।

पंचायती-राज-व्यवस्थायां जनानां सहभागिता इतोऽपि द्वयोः स्तरयोः भवति । ग्राम-पंचायतानन्तरम् अपरः स्तरः विकासखण्डस्य भवति । एषः जनपदपंचायत्तः अथवा पंचायतसमितिः उच्यते । एकस्यां ग्रामसमित्यां अनेके ग्रामपंचायत्ताः भवन्ति। पंचायतसमित्तेः उपरि जिलापंचायतः अथवा जिलापरिषद् भवति । एषः तृतीयः स्तरः भवति । जिलापरिषद् जनपदस्तरे विकास-परियोजनाः परिकल्पयति। पंचायतसमित्तेः साहाय्येन मण्डलपरिषद् सर्वेषु पंचायत्तेषु आवण्टितराशेः वितरणस्य व्यवस्थां करोति।

संविधाने प्रदत्तनिर्देशानाम् आधारेण देशस्य प्रत्येकं राज्यं देश-सम्बद्धाधिनियमान् रचितवत् अस्ति । अतः पंचायत-सम्बन्ध्यधिनियमः प्रत्येकं राज्ये किञ्चित् पृथक् भवितुं अर्हति। एतस्य पृष्ठे मुख्यः विचारः अयम् एव अस्ति यत् स्वग्रामस्य व्यवस्थायां जनानां सहभागिता वर्धेत अपि च ते स्वाभ्यर्थनाम् प्रस्तोतुम् अधिकाधिकाः अवसराः लभेरन्।

स्वाध्यापिकां निवेदयन्तु यत् सा कञ्चित् चितप्रतिनिधिं यथा प्रमुखं पंचप्रमुखं जनपद-परिषदः सदस्यं कक्षाम् आमन्त्रयेत् तेषां कार्याणां दायित्वानां च विषये वार्तालापं कुर्यात्।

## अभ्यासः

१. हरदासग्रामस्य जनाः कासां समस्यानां सम्मुखीकरणं कुर्वन्ति स्म ? ते स्वसमस्याः अपाकर्तुं किं कृतवन्तः ?

२. भवतां विचारेण ग्रामसभायाः किं महत्त्वम् अस्ति ? किं भवन्तः अनुभवन्ति यत्सर्वैः जनैः ग्रामसभायाः उपवेशने भागः ग्रहीतव्यः ? किमर्थम् ?

३. स्वक्षेत्रे अथवा स्वपार्श्वस्थे ग्रामे पंचायत्तद्वारा कृतस्य कस्यचित् एकस्य ग्रामस्य उदाहरणं स्वीकुर्वन्तु अपि च स्वस्य विषये निम्नलिखितानि तथ्यानि जानन्तु-

(क) इदं कार्यं किमर्थं कृतम् ?

(ख) धनं कुतः आगतम् ?

(ग) कार्यं पूर्णं जातम् अथवा न जातम् ?

४. ग्रामसभा-ग्रामपञ्चायतयोः मध्ये किम् अन्तरम् अस्ति ?

५. अधोलिखितं समाचारं पठन्तु अपि च प्रदत्तानां प्रश्नानाम् उत्तराणि यच्छन्तु-

चौफुला-शिरूरः राजमार्गे कश्चित् ग्रामः अस्ति निमोनः। अपरेषां ग्रामाणाम् इव गतबहुभ्यः मासेभ्यः एतस्मिन् ग्रामे पेयजलस्य महती समस्या अस्ति। ग्रामवासिनः स्वावश्यकतानां कृते जलवाहक-दण्डेन उपरि आश्रिताः सन्ति। एतस्य् ग्रामस्य ग्रामवासिनं महादेवलाडं(३५ वर्षीयम्) सप्त जनाः मिलित्वा डण्डेन लोहदण्डेन च ताडितवन्तः। एतस्याः घटनायाः ज्ञानं तदा अभूत् यदा केचन जनाः अचेतनं लाडं चिकित्सार्थं चिकित्सालयं नीतवन्तः। पुलिसप्राथमिक्यां लाडः लेखितवान् यत् तस्योपरि आक्रमणं तदा अभूत् यदा सः जलवाहक-यानात् जलं ग्राम्यजलागारे पूरयति स्म। जलागारः निमोन-ग्राम-पंचायत्तस्य जलापूर्तियोजनायाः अन्तर्गतं निर्मितः आसीत् यतः जलस्य समानरूपेण वितरणं स्यात्। परन्तु लाडस्य आरोपः आसीत् यत् उच्चजातेः जनाः एतस्य विरोधं कुर्वन्ति स्म। ते जल-वाहक-यानस्य उपरि दलित-जातीनाम् अधिकारः नास्ति इति मन्यन्ते स्म।

इंडियन-एक्सप्रेस इत्यस्य कश्चित् समाचारः, १मईमासः २००४

(क) लाडः किमर्थं ताडितः आसीत् ?

(ख) किं भवन्तः अनुभवन्ति यत् अयं कश्चन भेदभावस्य विषयः अस्ति ? किमर्थम् ?

६. जलसंरक्षणस्य तस्य लाभस्य च विषये इतोऽपि सूचनाः एकत्रीकुर्वन्तु।

इति पञ्चमोऽध्यायः